योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ५३

< योगवासिष्ठः | प्रकरणम् ५ (उपशमप्रकरणम्)

त्रिपञ्चाशः सर्गः ५३

उद्दालक उवाच ।

अपारपर्यन्तवपुः परमाण्वणुरेव च ।

चिदचेत्या तदाक्रान्तौ न शक्ता वासनादयः ।। १

मनः शेमुष्यहंकारप्रतिबिम्बैर्जडेन्द्रियैः ।

वासनाविततताः शून्या वेतालत्रासनोद्यताः ।। २

तत्कृतेभ्यो विचारेभ्योऽनुभूतेभ्योऽपि भूरिशः ।

भूयोऽप्यनुभवत्यन्तरहं हि चिदलेपिका ।। ३

स्वदुर्भावोपरचितां देहः संसारसंस्थितिम् ।

गृह्णात्वथ त्यजतु वाप्यहं हि चिदलेपिका ।। ४

चितो न जन्ममरणे सर्वगायाश्चितः किल ।

किं नाम म्रियते जन्तुर्मार्यते केन वापि किम् ।। ५

चितो न जीवितेनार्थः सर्वात्मा सर्वजीवितम् ।

किं प्राप्स्यति कदात्मैषा प्रायता यदि जीवितम् ।। ६

जीव्यते म्रियते चेति कुविकल्पकमालिनी ।

कलना मनसामेव नात्मनो विमलात्मनः ।। ७

यो ह्यहंभावतां प्राप्तो भावाभावैः स गृह्यते ।

आत्मनो नास्त्यहंभावो भावाभावाः कुतोऽस्य ते ।। ८

अहंभावो मुधा मोहो मनश्च मृगतृष्णिका ।

जडः पदार्थसंभारः कस्याहंकारभावना ।। ९

रक्तमांसमयो देहो मनो नष्टं विचारणात् ।

जडाश्चित्तादयः सर्वे कुतोऽहंभावभावना ।। १०

आत्मंभरितया नित्यमिन्द्रियाणि स्थितान्यलम् ।

पदार्थाश्च पदार्थत्वे कुतोऽहंभावभावना ।। ११

गुणा गुणार्थे वर्तन्ते प्रकृतौ प्रकृतिः स्थिता ।

सदेव सति विश्रान्तं कुतोऽहंभावभावना ।। १२

सर्वगं सर्वदेहस्थं सर्वकालमयं महत् ।

केवलं परमात्मानं चिदात्मैवेह संस्थितः ।। १३

एवं किमाकृतिः को वा किमादेशश्च किंकृतः ।

किंरूपः किंमयः कोहं किं गृह्णामि त्यजामि किम् ।। १४

तेनाहं नाम नेहास्ति भावाभावोपपत्तिमान् ।

अनहंकाररूपस्य संबन्धः केन मे कथम् ।। १५

असत्यलमहंकारे संबन्धः कस्य केन कः ।

संबन्धाभावसंसिद्धौ विलीना द्वित्वकल्पना ।। १६

एवं ब्रह्मात्मकमिदं यत्किंचिज्जगति स्थितम् ।

सदेवास्मि तदेवास्मि परिशोचामि किं मुधा ।। १७

एकस्मिन्नेव विमले पदे सर्वगते स्थिते ।

अहंकारकलङ्कस्य कथं नामोदयः कुतः ।। १८

नास्त्येव हि पदार्थश्रीरात्मैवास्तीह सर्वगः ।

पदार्थलक्ष्म्यां सत्यां च संबन्धोस्ति न कस्यचित् ।।१९

इन्द्रियैरिन्द्रियैरंगैर्मनो मनसि वल्गति ।

चिदलिप्तवपुः केन संबन्धः कस्य किं कथम् ।। २०

उपलायःशलाकानां संबन्धो न यथा मिथः ।

तथैकत्रापि दृष्टानां देहेन्द्रियमनश्चिताम् ।। २१

असदभ्युत्थिते व्यर्थमहंकारमहाभ्रमे ।

ममेदमिदमस्येति विपर्यस्तमिदं जगत् ।। २२

अतत्त्वालोकजातेयमहंकारचमत्कृतिः ।

तापेन हिमलेखेव तत्त्वालोके विलीयते ।। २३

आत्मनो व्यतिरेकेण न किंचिदपि विद्यते ।

सर्वं ब्रह्मेति मे तत्त्वमेतत्तद्भावयाम्यहम् ।। २४

अहंकारभ्रमस्यास्य जातस्याकाशवर्णवत् ।

अपुनःस्मरणं मन्ये नूनं विस्मरणं वरम् ।। २५

समूलं संपरित्यज्य चिरायाहंकृतिभ्रमम् ।

तिष्ठाम्यात्मनि शान्तात्मा शरत्खं शरदीव खे ।। २६

ददात्यनर्थनिचयं विस्तारयति दुष्कृतम् ।

विस्तारयति संतापमहंभावोनुसंहितः ।। २७

स्फुरत्यहंकारघने हृद्व्योम्नि सलिलात्मनि ।

विकसत्यभितः कायकदम्बे दोषमञ्जरी ।। २८

मरणं जीवितोपान्तं जीवितं मरणान्तगम् ।

भावोऽभावाद्व्यवच्छिन्नः कष्टेयं दुःखवेदना ।। २९

इदं लब्धमिदं प्राप्स्यामीत्यार्तिर्दाहकारिणी ।

न शाम्यत्यर्करत्नानां ग्रीष्मेऽग्निरिव दुर्धियाम् ।। ३०

नास्तीदमिदमस्तीति चिन्ता धावत्यहंकृतिम् ।

जडाशया जडामभ्रमाला शैलावलीमिव ।। ३१

अहंभावे परिक्षीणे शुष्कः संसारपादपः ।

भूयः प्रयच्छत्यरसो न पाषाणवदंकुरम् ।। ३

स्वतृष्णाकृष्णभोगिन्यो देहद्रुमकृतालयाः ।

क्वापि यान्ति विचारात्मन्यागते विनतासुते ।। ३३

असदभ्युत्थिते विश्वे तज्जाते भ्रमसन्मये ।

असन्मयपरिस्पन्दे त्वहं त्वं चेति कः क्रमः ।। ३४

इदं जगदुदेत्यादावकारणमकारणात् ।

यदकारणमुद्भूतं तत्सदित्युच्यते कथम् ।। ३५

अपर्यन्तपुराकाले मृदि कुम्भ इवाकृतिः ।

देहोऽभवदिदानीं तु तथैवास्ति भविष्यति ।। ३६

मध्येतरपयोमात्रं कंचित्कालं चलाचलम् ।

आद्यन्तसौम्यते त्यक्त्वा वारि वीचितया यथा।। ३७

अस्मिन्क्षणपरिस्पन्दे देहे विसरणोन्मुखे ।

तरङ्गे च निबद्धास्था ये हतास्ते कुबुद्धयः ।। ३८

प्राक्पुरस्ताच्च सर्वाणि सन्ति वस्तूनि नाभितः ।

मध्ये स्फुटत्वमेतेषां कैवास्था हतरूपिणी ।। ३९

चित्तं पूर्वं पुरस्ताच्च चिद्देशं शान्तमित्यपि ।

सदसद्वा खलीनं मध्येऽस्मिन्किं तवोदितम् ।। ४०

यथा स्वप्नविकारेषु यथा संभ्रमदृष्टिषु ।

यथा वा मदलीलासु यथा नौयानसंभ्रमे ।। ४१

यथा धातुविकारेषु यथा चेन्द्रियविक्लवे ।

यथातिसंभ्रमानन्दे दोषावेशदशासु च ।। ४२

दृश्यते क्षीयते चैव रूपं सदसतोश्चलम् ।

तथैवेयमिह त्वेषा काले न्यूनातिरिक्तता ।। ४३

सा च त्वया कृता नित्यं चित्त दुःखसुखोदये ।

यथा वियोगयामिन्यो मतयो हन्ति रागिणम् ।। ४४

मयैवेहासदभ्यासान्मिथ्या सदिव लक्ष्यसे ।

मृगतृष्णेव तेनैतत्त्वत्कृतं मत्कृतं भवेत् ।। ४५

यदिदं किंचिदाभोगि तत्सर्वं दृश्यमण्डलम् ।

अवस्त्विति विनिर्णीय मनो यात्यमनःपदम् ।। ४६

अवस्त्विदमिति स्फारे रूढे मनसि निश्चये ।

हेमन्त इव मञ्जर्यः क्षीयन्ते भोगवासनाः ।। ४७

चित्त्वाद्दृष्टात्मना नूनं संत्यक्तमननौजसा ।

मनसा वीतरागेण स्वयं स्वस्थेन भूयते ।। ४८

परमात्मानले क्षिप्तं संवृत्त्यावयवं स्वयम् ।

दग्ध्वात्मानमलं चित्तं शुद्धतामेति शाश्वतीम् ।। ४९

देहमन्यतया दृष्ट्वा त्यक्त्वा विषयवासनाम् ।

विनाशमुररीकृत्य मनो जयति वीरवत् ।। ५०

मनः शत्रुः शरीरस्य शरीरं मनसो रिपुः ।

एकाभावेन नश्येते आधाराधेयकार्यवत् ।। ५१

रागद्वेषवतोर्नित्यमन्योन्यातिविरुद्धयोः ।

एतयोर्मूलकाषेण विनाशः परमं सुखम् ।। ५२

एतयोरेकसंस्थाने मृतिरित्येव या कथा ।

सा व्योम्यया स्त्रिया भुक्ता धरेति कथया समा ५३

अकृत्रिमविरोधस्थौ यत्र संघटितावुभौ ।

धारा इव पतन्त्येव तत्रानर्थपरम्पराः ।। ५४

मिथो विरुद्धसंसर्गे रतिमेत्यधमो हि यः ।

त्यक्तव्यः स पतद्वारावग्निराशावलेपने ।। ५५

संकल्पेन मनः पुष्ट्वा शरीरं बालयक्षवत् ।

आयुरेवाशनान्यस्मै स्वदुःखानि प्रयच्छति ।। ५६

तर्दुःखैस्तापितो देहो मनो हन्तुमथेच्छति ।

पुत्रोऽपि हन्ति पितरमाततायिपदं गतम् ।। ५७

नास्ति शत्रुः प्रकृत्यैव न च मित्रं कदाचन ।

सुखदं मित्रमित्युक्तं दुःखदाः शत्रवः स्मृताः ।। ५८

देहो दुःखान्यनुभवन्स्वमनो हन्तुमिच्छति ।

देहं मनः स्वदुःखानां संकेतं कुरुते क्षणात् ।। ५९

एवं मिथो दुःखदयोः श्लिष्टयोः कः सुखागमः ।

एतयोर्देहमनसोर्जात्यैवातिविरुद्धयोः ।। ६०

मनस्येव परिक्षीणे न देहो दुःखभाजनम् ।

तत्क्षयोत्कतया नित्यं देहोऽपि परिधावति ।। ६१

नष्टानष्टमनर्थाय शरीरं पदमापदाम् ।

अलब्धात्मविवेकेन मनसा सुप्रजायते ।। ६२

एते मनःशरीरे हि मिथः पीवरतां गते ।

जडरूपे हि वपुषा पयोदसरसी यथा ।। ६३

मिथो दुःखाय संपन्ने एकरूपे द्विधा स्थिते ।

व्यवहारपरे सार्धं लोके वार्यनलाविव ।। ६४

चित्ते क्षयिणि संक्षीणे देहो ह्यामूलितो भवेत् ।

वर्धमाने तरुरिव शतशाखः प्रवर्तते ।। ६५

क्षीयते मनसि क्षीणे देहः प्रक्षीणवासनः ।

मनो न क्षीयते क्षीणे देहे तत्क्षपयेन्मनः ।। ३६

संकल्पपादपं तृष्णालतं छित्त्वा मनोवनम् ।

विततां भुवमासाद्य विहरामि यथासुखम् ।। ६७

प्रक्षीयमाणमेवेदं न मनो मनसि स्थितम् ।

प्रशाम्यद्वासनाजालं प्रावृडन्त इवाम्बुदः ।। ६८

धातूनां संनिवेशोऽयं देहनामा रिपुर्मम ।

प्रक्षीयमाणे मनसि गलत्वेषोऽवतिष्ठतु ।। ६९

यदर्थं किल भोगश्रीर्वाञ्छते स्वकलेवरम् ।

तन्मे नापि न तस्याहं कोऽर्थः सुखलवेन मे ।। ७०

नाहं देह इति त्वस्मिन्युक्तिमाकर्णय क्रमे ।

सर्वाङ्गेष्वपि सत्स्वेव शवः कस्मान्न वल्गति ।। ७१

तस्माद्देहादतीतोऽहं नित्योऽनस्तमितद्युतिः ।

यः सङ्गं भास्वता प्राप्य वेद्मि व्योमनि भास्करम् ।। ७२

नाज्ञोऽहं नच मे दुःखं नानर्थो न च दुःखिता ।

शरीरमस्तु मावास्तु स्थितोस्मि विगतज्वरः ।। ७३

यत्रात्मा तत्र न मनो नेन्द्रियाणि न वासनाः ।

पामरा परितिष्ठन्ति निकटे न महीभृतः ।। ७४

पदं तदनुयातोऽस्मि केवलोस्मि जयाम्यहम् ।

निर्वाणोस्मि निरंशोस्मि निरीहोस्मि निरीप्सितः ।। ७५

इदानीमस्म्यसंबद्धो मनोदेहेन्द्रियादिभिः ।

पृथक्कृतस्य तैलस्य तिलैर्विगलनैरिव ।। ७६

स्वस्मात्पदवरादस्माल्लीलया चलितस्य मे ।

पृथक्कृतमतेः किंच परिवारो ह्ययं शुभः ।। ७७

स्वच्छतोर्जितता सत्ता हृद्यता सत्यता ज्ञता ।

आनन्दितोपशमिता सदा च मृदुभाषिता ।। ७८

पूर्णतोदारता सत्या कान्तिमत्तैकतानता ।

सर्वैकता निर्भयता क्षीणद्वित्वविकल्पता ।। ७९

नित्योदिताः समाः स्वस्थाः सुन्दर्यः सुभगोदयाः ।

ममैकात्ममतेर्नित्यं कान्ता हृदयवल्लभाः ।। ८०

सर्वथा सर्वदा सर्वं सर्वस्मिन्संभवत्यतः ।

सर्वं प्रति मम क्षीणे वाञ्छावाञ्छे सुखासुखे ।। ८१

विगतमोहतया विमनस्तया

गतविकल्पनचित्ततया स्फुटम् ।

उपरमाम्यहमात्मनि शीतले

घनलवः शरदीव नभस्तले ।। ८२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे उद्दालकविचारविलासो नाम त्रिपञ्चाशः सर्गः ।। ५३ ।।